No. १०५८ क

Title कुलयामल

Author

Extent ११ पत्र Age

Subject तन्त्र

कुलयामल

नं० १०५८

114

८· ऊलयामलं १·

5528

F — 11

Complete.

Shiva

नं १०५८ – के

कुल अंक ११ पत्राणि

र. ना


श्री रणबीर पुस्तकालय
मंदिर श्री रघुनाथ जी

श्रीगणेशाय नमः ॥

कौ० ओं श्रीभगवानुवाच कौलायथाव्रजंतीतस्तथात्वेष्टगणवल्लभे धर्मराजः सदासी
१ यानामंतश्चित्रंतथैवच १ शातमेथाङ्गसमयेगणानाधिमहेश्वरि सदासिद्धयते श्री
देवः सूर्यपुत्रोमहामतिः २ नारायणीहिमसुताजननीचबालाश्रीसुंदरी
चविजयाकिलकालिकेति इत्यादिनामजपतांतिकटेभटामेगत्वाप्यथा
र्तिपरमांसुखहानिमेव ३ जालंधाचजयंतीचविशालाक्षीचकालिका
इत्यादिजल्पतामग्रेगत्वाहानिमवाप्नुयुः ४ येषांवदनतोहृत्तामभवानी
नामनिस्सरेत् तेषामग्रेसमागत्यपरमंदुःखमाप्नुयुः ५ तस्माद्दर्शं शि
वे सयामिवारंवारंमहाभटाः तत्रापिकुलमार्गीणांदासोस्मिप्रवदेभ्रशं ६
आसीत्त्रेतायुगेकश्चिद्ब्राह्मणोवेदपारगः शिवशर्मेतिविख्यातोवेदांगनि
पुणोमहान् ७ दिव्याद्वविंशत्यपर्यंतसुतेपेपरमंतपः तपसातस्यसुभटांब
रमंजग्मुरिंद्रश्चाशंकितोभवत् ९ एतस्मिन्नेवकालेतुचिंताविष्टोपुरंदरः

दर्वर्षीन्प्रेषयामास देवमायामिव स्फुटां १० सा रंभा मेनकाभ्यां च समा
गत्य च पंचमं चकार विस्मिता नैव मोहितुं न शशाक ह ११ वर्षमात्रे
व्यतीतेतु न मोहं प्राप्सवास्वदा तदोर्वशी जगामाशु त्रिदिवं लज्जिता
भृशं १२ तां दृष्ट्वा विमना इंद्रः किं कर्तव्यं मयाधुना विशोकः केन का
र्येण भवामीत्यविचिंतयत् १३ चिंताविष्टेन तेनाथ देवा वह्निपुरोग
माः आहूतास्तानुवाचाथ हृष्टांतं नाकनायकः १४ श्रीइंद्र उवाच देवाः
शृणुत मे वाक्यं परमादरसंयुताः श्रुत्वा विधीयतां पश्चाद्भवद्भिः प्रीति
संयुतैः १५ पदवीं मे समादातुं मुनेर्यत्नो हि च वोत्तमः कथं विघ्नो भवेद
स्य तपसः शीघ्रमेवाह १६ इति वाक्यं समाकर्ण्य प्रोवाच वरुणो महा
न् कथं पुरंदरेशान क्रियते चिंतवैशासं १७ वारुण्यं विद्यमानायां कि
मिदं चिंत्यते त्वया तंत्र गत्वा च वै कश्चिद्गृहीत्वोग्रां च वारुणीं १८ य
स्याः स्पर्शेन स मुनिर्नूनं क्षीवतामाप्स्यते परं नाशो वै तपसः स्यात्तत्राङ्गवि

ष्यतितथामुनेः १९ इतिवाक्यंसमाकर्ण्यमुदितोभूत्पुरंदरः पुनःसप्रेष
यामासत्वप्सरोगणमुत्तमं २० अथोर्वशीमहाभागगृहीत्वोग्रांचवारुणीं
जगामसामुनेःपार्श्वंमोहनायमहामतिः २१ तत्रगत्वोर्वशीदेवीवि
क्षेपचनतौमुनः महोग्रांवारुणींदेवीपरमादरसंयुता २२ यस्याःस्प
र्शंसमासाद्यशंभोरपिमुदायुतः कामसंपद्यतेसाक्षात्समाधिनपता
शातः २३ क्षेपमात्रेणवैतस्याःकामस्तस्यमहामुनेः उत्पतिमगमच्छी
घ्रंकयोनिरितिवैजगौ २४ एवंलालप्यमानोसौमुनिरुल्लाससंयुतः
नेत्रेचोन्मीलितस्तद्दृशेत्वप्सरोगणमद्भुतं २५ तत्रापिचोर्वशीदेवीमा
लिंगंतीमुहुर्मुहुः सोपिचालिंगनंचक्रेतस्याःपरममोहितः २६ एत
स्मिन्नेवकालेतुस्खलितोभूद्दिजायमः सापिचांतर्हिमापेदेत्वप्सरो
गणमंडिता २७ सविप्रोहाविशालाक्षीहाहाकोमलभाषिणि हादे
विक्कगतासित्वंपातिताशोकसागरे २८ हाहाकमलपत्राक्षिहाहाशाद्व

वरानने क्वगतासिगतासिकुत्र खिन्नेनावलोकसे २९ एवंविलप्यबहु
धासविप्रःपापपूरितः रुरोदसम्भ्रमंप्राप्य साक्वगतासीतिमुहुर्मुहुः ३० काश्यां
सपर्यटन्क्वापिददर्शवारियोषितं विशालनयनांनाम्नाख्यातांकामकले
तिच ३१ तांदृष्ट्वासमुनिस्तस्याजगामाथनिवेशनं सुमोहसम्भ्रमंप्राप्य मूढोदे
वमायावशानुगः ३२ श्रीदेव्युवाच देवदेवकृपासिन्धोभक्तानुग्रहतत्पर
तपोमयंतस्यवपुर्दिव्यवर्षैर्दृढंविभो ३३ वीर्यंवासफलंतस्यनिष्फलंवा
वभूवह एतन्मेसंशयंछिंधिकृपयाजगदीश्वर ३४ श्रीभगवानुवाच सा
धुपृष्टंत्वयाभद्रेलोकानुग्रहतत्परं एतेनातस्यवीर्याच्चमिथुनंसंवभूव
ह ३५ तीर्थयात्रादिसामग्रींगृहीत्वापरमेश्वरि एतस्मिन्नेवकालेतुवागु
वाचाशरीरिणी ३६ दीक्षितोयंहेतुकार्येत्वयारम्भभविष्यति संयोगदृक्च
मयिचभविष्यतिपरंशुभं ३७ अयंसुलोचनोनामनारीचास्योत्कटीतिच
देवानांदानवानांचसर्वेषांदीक्षितोस्त्ययं ३८ एवंतद्वीर्यतोजातोदीक्षितः

कौ॰ २

3

कार्यकारकः येनप्रचारिणादेविनूतनाहेतुसत्क्रिया ३९ शृणुदेविचवृत्तांतंमू
योविप्रस्यभामिनि सविप्रोगणिकांदृष्ट्वामोहितःकामसायकैः ४० सापिसं
मुग्धहेरूपंतस्यदृष्ट्वापरंतपे उभयोःप्रीतिरुत्पन्नागणिकाविप्रयोःशिवे ४१
पुत्रपौत्रधनादीनांवृद्धिंलेभेमहामनाः सनंदनप्रसादेनकुलधर्ममवाप्य
च ४२ अथासौकालवशतोदेहत्यागस्यवैशिवे समयेहेतयानेनपवि
त्रःपरमोमहान् ४३ एतस्मिन्नेवकालेतुयमदूताःसुदारुणाः आगतास्त
स्यविप्रस्यग्रहणायमहामते ४४ ऊर्ध्वकेशाविरूपाक्षामहामुद्गरपाण
यः त्रासयंतोमहात्मानंद्विजंपरममोहिताः ४५ तेषांमध्येविरूपाक्षोना
म्नासीदधियोगणः यस्ययोजनविस्तारोमुद्गरःपाणिगोचरः ४६ विरूपा
क्षउवाच गणाःशृणुध्वंमेवाक्यंयथावत्कथयामिवः पश्यंत्वनेनपापेन
समयेमरणस्यच ४७ सुरानिपीताचनतःप्रहारंक्रियतांगणाः श्रीभग
वानुवाच आज्ञामितिसमालभ्यगणामुद्गरपाणयः ४८ यावत्कुर्युःप्रहा

ऽंस्तेनावद्गीतः कुलो द्विजः तत्प्राच दिव्यवचनैर्देवी मानंददायिनी श्रीदे
व्युवाच यन्यदेव महाभाग जगत्त्रितयतारकः शिवशर्मकथां श्रुत्वा विदी
र्णं मम मानसं १ कुलसंकटमाकर्ण्य नेत्रेस्य श्रुसमाकुले विदीर्णमानसं
मस्यैकावस्थातस्य चाभवत् २ श्रीभगवानुवाच गिरिराजसुते देवि धन्या
ते मतिरुज्वला कुलसंकटमाकर्ण्य यस्य चेतो विदीर्यते ३ दृष्टान्तुग्रहस्त्रू
पांस्तु विरूपान्तलक्षणो नमः कारुण्यलहरीस्तोत्रं नारदोक्तमुवाच सः ४
शिव उवाच यामामनंति मुनयः प्रकृतिं पुराणीं विद्येति यां श्रुतिरहस्यवि
दो गृणंति नामर्द्धपल्लवितशंकररूपमुद्रां देवीमनन्यशरणः शरणं प्र
पद्ये ५ शंवस्तवेष्टतवतावककर्णिकाणि कंठे भवंति वचसामपि गुंफ
नानि डिंवस्य मे स्तुति रसायन मुंडनापि वात्सल्य निघ्न हृदयां भवती धिनो
तु ६ ओमेति विडरितेनादइंनीडलेखा त्रूपेति वा भवतनू रिति मातृ
केति निस्यंदमानसुखबोधसुधास्वरूपा विद्योतसे मनसि भाग्यवतां ज

कौ॰
ष

नानां ७ आविर्भवत्पुलकसंहतिभिः शरीरैर्निस्यंदमानसलिलैर्नयनैश्च नित्यं
वाग्भिश्च गद्गदपदाभिरुपासिते ये पादौ न तावकभुवनेषु त एव धन्याः ८ वक्रेय
डयतमभीष्टतये भवत्यास्तुभ्यं नमो यदपि देवशिरः करोति चेतश्च यश्चपित
रायणमंवतानि कस्यापि कैरपि भवंति तपोविशेषैः ९ मूलालवालकुह
राडहिता भवानि निर्भिद्य षट्सरसिजानि तडिल्लतेव भूयोपि तत्र विशा
सिक्तवमंडलेंदु निस्यंदमानपरमामृततोयरूपा १० दर्पं यदा मदनमे
कमनेकयाते मुग्धः करात्तविधिरंकुरयांचकार यत्नेन तापप्रभृति देवि
ललाटनेत्रं सस्पृहियेव मुकुलीकृतमिंदुमौलिः ११ प्रस्तात संभव मना
भवत्याः शंभुं कपर्दवदुपे गिरिराजकन्ये दूर्वीकरग्रहणमंगलमो
पनं च भिक्षाटनं च नटनं च परेतभूमौ वेतालसंहतिपरिग्रहता च शंभोः
शोभां विभर्ति गिरिजे तव साहचर्यात् १३ कल्पोपसंहरणकेलिषु पंडि

नानिचंडानिखंडपरशोरपितांडवानि आलोकनेनतवकोमलितेन
मातर्लास्यालसेनापरिणमंतिजगद्विभूत्यै: १४ जंतोर्पश्चिमतनोःसति
कर्मसाम्येनिःशेषरागपटलच्छिदुरानिमेषात् कल्यादैशिककटा
क्षसमाश्रयेणकारुण्यतोभवतिशांभववेददीक्षा १५ मुक्ताविभू
षणवतीनवविद्रुमाभायश्चेतसिस्फुरसितारकितेवसंध्या एकस्स
एवभुवनत्रयसुंदरीणांकंदर्पतांव्रजतिपंचशरींविनापि १६ येभा
वयंत्यमृतवाहिभिरंशुजालैराप्याय्यमानभुवनाममृतेश्वरींत्वां तेलं
घयंतिननुमातरलंघनीयांब्रह्मादिभिःसुरवरैरपिकालकक्ष्यां १७ यः
स्फाटिकाक्षगुणपुस्तककुंडिकाढ्यांव्याख्यासमुद्यतकरांशरदिंदुशु
भ्रां पद्मासनांचभवतींहृदयेऽन्वयास्तेमातःसविश्वकवितार्किकचक्र
वर्ती १८ बर्हावतंसयुतबर्बरकेशपाशांगुंजावलीकृतघनस्तनहा
रशोभां श्यामांप्रवालवदनांसुकुमारहस्तांत्वामेववनैमिशबरीशव

कौ॰ ५
5

रस्यनाथं १९ अर्द्धेन किं नवलिनाललितेन तुंगपेक्षीतं विभोः पुरुषमर्द्धमि
दं त्वयेति आलीजनस्य परिहासवचांसि मन्ये मंदस्मितेन तव देवि जडी
भवंति २० ब्रह्मांडबुद्बुदकदंबकसंकुलोयं मायोदधौ विविधदुःखतरं
गमालः आश्चर्यमंब कटितिप्रलयं प्रयाति त्वज्ज्ञानसंततिमहावडवा
मुखाग्नौ २१ दाक्षायणीति कुटिलीति कुहारिणीति कात्यायनीति कम
लेति कलावतीति एकासती भगवती परमार्थतोपि संदृश्यते बहुवि
धा ननु नर्तकीव २२ आनंदलक्षणमनाहतनाम्नि देशे नादात्मना परि
णतं तव रूपमीशे प्रत्यङ्मुखेन मनसा परिचीयमानं शंसंति नेत्रस
लिलैः पुलकैश्च धन्याः २३ त्वं चंद्रिका शशिनि तिग्मरुचौ रुचिस्त्वं त्वं चेत
नासि पुरुषे पवने बलं त्वं त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा निः
सारमेव निखिलं त्वदृते यदि स्यात् २४ ज्योतींषि यद्दिवि चरंति यदंतरि
क्षे सूते पयांसि यदहिर्धरणी च धत्ते यद्वाति वायुरनिलो यदुदर्चिरास्ते

तत्सर्वमंदवकेवलमात्तयैव २५ संकोचमिच्छसि यदा गिरिजे तदानीं
वाक्चर्चयोस्तममसि नूनमनामरूपा यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनासुकरो भवंति २६ भोगाय देवि भवतीं कृतिनः प्रणा
म्य भ्रूकिंकरीकृतसरोजगृहासहस्राः चिंतामणिप्रचयकल्पितएव
शैले कल्पद्रुमोपवनएव चिरं चरंति २७ हंत त्वमेव भवसि त्वदधीन
मीशे संसारतापमखिलं दययापहर्तुं वैकर्त्तिनी किरणसंहतिरेव
दत्ता यमेनिजं शमयितुं निजया पितृष्णाः २८ शक्तिः शरीरमधिदैव
तमंतरात्मा ज्ञानं क्रियाकरणमासनजालमिच्छा ऐश्वर्यमायतनमा
वरणानि च त्वं किं तन्न यद्भवति देवि शशांकमौले २९ भूमौ निवृत्तिरु
दिता पयसि प्रतिष्ठा विद्यानले मरुति वा तिरतीव शांतिः व्योम्नीतयाः
किल कलाः कलयंति विश्वास्तासां हि दूरतरमेव पदं द्वितीयं ३० यावत्प
दं पदसरोजयुगं त्वदीयं नांगीकरोति हृदयेषु जगच्छरण्ये तावद्विक

णिजटिलाः कुटिलप्रकारास्तर्कग्रहाः समयिनां प्रलयं नयंति ३१ यद्देवया
नापि न्हयानविहारमेकीकृत्वा मनःकरणमंडलसार्वभौमं यानेतिवेश्प
तवकारणपंचकस्य पर्वाणि पार्वति नयंति निजासनत्वं ३२ स्थूलास्त
मूर्तिषु मयी प्रमुखास्तु मूर्तेः कस्याश्च नापि तव वैभवमंबयस्याः पत्या
गिरामपि न शक्यतपव वक्तुं सापि स्तुता किल मयोति नितिद्गतनव्यं ३३
कालाग्निकोटिरुचमंब षडध्वशुद्धावाप्लावनेषु भवतीमम्नौघहार्षिं
शुभांशु चनास्तनन्तरांमकलीकृतौ च ध्यायंति पव जगतां गुरवो भवं
ति ३४ विद्यां परां कति चिंदवरमंब केचिदानंदमेव कति चित्कति चिद्व
मायां त्वां विश्वमाहुरपरेव मयमामनामः साक्षादपारकरुणां गुरुमूर्ति
मेव ३५ कुवलयदलनीलं वर्बरास्निग्धकेशं पृथुतरकुचभारक्रांतकां
तावलग्नं किमिह बहुभिरुक्तैः स्वस्वरूपं परं तः सकलभुवनमातः सं
ततं संनिधत्तां ३६ कारुण्यकोमलकटाक्षविराजमाने संसारतारिणि शि

वेसकलायहंवि श्रीमंत्रराजनिलये शिवयाऽद्वविश्वसेवेस्तसुंदरिकृपां
मयिसन्निधेहि ३७ बिंदुत्रिकोणवसुकोणदशारयुग्ममन्वस्रनागदल
संयुतषोडशारं वृत्तत्रयंचधरणीसदनत्रयंच श्रीयंत्रमेतदुदितंप
रदेवतायाः ३८ यत्पूजयामिजगदीश्वरभक्तिवश्ये सर्वस्वरूपमयि
मेकरुणायदिवि दृष्ट्वामिनैवपुनरेवंचस्वलोचनाभ्यांहाहाहतोस्मि
वधिगस्मिसुवर्चितोस्मि ३९ श्रीभगवानुवाच इतिवाक्यंसमाकर्ण्य
स्तोत्रराजंविचक्षणे खेदंशामयित्वंतस्यत्यागतापरमेश्वरी ४० श्री
विद्यायाःशिवेनित्यानाम्नायावह्निवासिनी वदनेतास्तुवित्तेपञ्चा
शत्सहस्रशः ४२ ब्रवशिष्टास्तुयेकेचित्द्विजाःश्रृणुतभोस्तु
ते नेममाद्ये समागत्यछिन्नताप्राविशुक्रशुः तांस्तादृशान्समालो
क्यहतांतः पूर्वमेवहि ४३ मयात्तानोभवायास्तुप्रतापःश्रूयतांभटाः
हतांतमखिलंश्रुत्वानानुवाचातिहर्षितः ४४ उत्क्षिप्यवाहूप्रवदे

श्रृणुध्वंमूढचेतसः दुर्गाभक्तियुतानांचनहंदंडयितुंक्षमः ४५ एतस्मिन्ने
वकालेतुदेवीवह्निनिवासिनी पृथ्वींमेप्रेषयामासवह्निंपरमदारुणं
४६ संवर्तवह्निसदृशंप्रदहंतंदिशोदश तंवह्निंचसमालोक्यपरम
त्रासंसंयुतः यदातिरेवसंभूत्वागतोहंवह्निवासिनीं ४७ तत्रगत्वास्तु
तिंचक्रेश्रीविद्यायामहाभटाः स्तोत्रंकल्पयतांनामपठित्वावेदसं
मितं ४८ सर्ववेदागमाम्नायरहस्यंशिवभाषितं यस्यप्रसादमासा
द्यश्रीविद्यावशगोभवेत् ४९ श्रीयमराजउवाच सुंदरी १ त्रिपुरा २
कामा ३ कामिनी ४ सायकप्रिया ५ प्रमोदा ६ सत्यवचसा ७ विमोहा
८ मोहनाशिनी ९ ५० स्मरतेश्वरी १० चकल्याणी ११ कारुण्या १२ क
रुणा १३ कला १४ कलातीतः १५ कोमलांतःकरणा १६ विश्वनायिका
१७ ५१ विघ्नहर्त्री १८ विघ्नकर्त्री १९ विघ्नेश्वरी २० विघ्नदायिनी २१ कामा
या २२ कामनिलया २३ कामेश्वरी २४ भगमालिनी २५ ५२ त्रिखंडा २६

योनिमुद्राच २७ धेनुमुद्राच २८ खेचरी २९ वशंया ३० ऊष्मा ३१ द्राविणीच ३२
मोहिनी ३३ मदभंजनी ३४ ५३ मदप्रिया ३५ मदाराध्या ३६ मदमत्ता ३७ म
दोन्मदा ३८ मददाच ३९ मदाघूर्णी ४० मदांगी ४१ मदमोहिनी ४२ ५४ मा
यंती ४३ मदकल्याणी ४४ मदमाया ४५ मदालसा ४६ कला ४७ काष्ठा ४८
कलेशीच ४९ कल्यांना ५० कल्पकारिणी ५१ ५५ सुकल्पा ५२ कोमलांगीच ५३
विश्वमाया ५४ युगंधरी ५५ युगेशी ५६ युगमर्यादा ५७ श्रीविद्याः ५८ विश्व
तारिणी ५९ ५६ सुंदरीच ६० शिवाराध्या ६१ विश्वमाता ६२ कुलाकुला ६३ कु
लेशी ६४ कुलमर्यादा ६५ कुलाचारा ६६ कुलप्रिया ६७ ५७ अनाचाराकुलध्वं
सा ६८ ब्रह्मविद्या ६९ विमोहिनी ७० श्रीयंत्रनिलया ७१ यंत्रा ७२ यंत्रेशी ७३
यंत्रनायिका ७४ ५८ यंत्राराध्या ७५ यंत्ररूपा ७६ यंत्रकोणनिवासिनी ७७
अमोघा ७८ सत्यसंकल्पा ७९ सत्या ८० सत्यनिवासिनी ८१ ५९ सत्यागमा ८२
सत्यवहा ८३ सत्यवपुषा ८४ जनप्रिया ८५ शरीरवासिनीवामा ८६ वामभा

कौ॰
प
8

गीच ८७ दक्षिणा ८९ ९॰ कौलकी ९॰ कुलवश्याच ९१ कुलमार्गप्रवर्तिनी ९२
कुलाराध्या ९३ कुलेशीच ९४ कौलिकी ९५ कुलनायिका ९६ ८१ कुलकल्या
णदा ९७ कौले ९८ कपालावलिधारिणी ९९ कपालकुंडला १०० काली १०१
कालिका १०२ कुलनाशिनी १०३ ९२ गीता १०४ गीतप्रिया १०५ कामा १०६ सगी
ता १०७ नागशालिनी १०८ स्तवराजेसमाकर्ण्यसपत्न्या वह्निवासिनी ८३ अस्य
तेषुप्रवाच अयारम्यमहाभागयमसंयमिनीपते भवानीभक्तनिकटेजातत
प्रेष्यतांभटः ८४ प्रेषितेत्वभटेचैवतववनाशोभविष्यति इदंपदंचतेनष्टेभ
विष्यतिनसंशयः ८५ यमउवाच एवमेतन्मयाकार्यंकपालोदेवचंहिते
तेषुमेवप्रकर्तव्योनाशोयासंतियेभटाः ८६ अस्यतेप्युवाच वरंवरय
देवेशात्वयंत्वमहामते ददामाद्यतव्यमपितववाक्यवशीकृता ८८ य
मउवाच अयमेववरोमह्यंदीयतांभक्तवत्सले स्तवराजेनसंतुष्टाजाय
तांपरमेश्वरी ७० सुंदरीजगतामाद्याभक्तानामाभयंकरी अनादिनियना

देवीसर्वज्ञागमसेविता ७१ अस्तेषूवाच स्तवराजेनचानेनकरु
णार्द्रीभवद्धृदा श्रीविद्याप्रेषितादेवतयाहंरक्षणाश्रिते ७२ वाक्यंत्वा
प्रतिचोक्तंहि स्तवराजस्तुतिस्तुतं श्रूयतांपरमाह्लादकारणंसुखदाय
कं ७३ एककालंद्विकालंवात्रिकालमपियोयम स्तवराजंपठेत्प्रीत्या
तस्यपुण्यंनगण्यते ७४ पापानिप्रलयंयांतिसिद्धीनामुदयोभवेत्
कोटिजन्मसमुद्भूतपुण्यैरेषोऽत्रलभ्यते ७५ अपुत्रोलभतेपुत्रमधनो
धनवान्भवेत् विद्यार्थीलभतेविद्यांसुखार्थीलभतेसुखं ७६ कामार्थी
लभतेकामंमोक्षार्थीमोक्षमाप्नुयात् तद्गृहेतवहृतानांननिर्वासः
प्रजायते ७७ गच्छत्वंस्वपुरेभद्रममाज्ञांशासनभ्रत भवानीभक्तितो
भीतिःकार्यामनसिसत्तमः ७८ यमउवाच इतिवाक्यंसमाकर्ण्यप्रणि
पत्यास्तेश्वरी आगतोहंनिजपुरेनथावह्निनिवासिनी ७९ तस्मा
दहंशिक्षयामिवारंवारंमहाभटाः भवानीभक्तनिकटेनगंतव्यंकदा

कौ· चन ७ यस्याःस्मरणमात्रेणब्रह्माद्याःप्रभवंतिहि रुद्राद्याश्चलीयंतेय
९ दाज्ञाविधिगोचराः ८ इतिश्रीकुलयामिलेसर्वागमाम्नायसिद्धागमे
९ लवराजकथनंनामसप्तमंयामिलं ७ श्रीभगवानुवाच इतिवाक्यं
समाकर्ण्यधर्मराजस्यतेभटाः श्रोतुमनोरमंवाक्यंप्रणिपातपुरःस
रं १ भटाऊचुः धर्मराजकृपासिंधो पितृनाथदयामय वयंहितारि
णादेवकृतारक्षावचनोद्यताः २ भ्रमेणापिनगंतव्यंस्वप्नेनोमोहतोपि
वा भवानीभक्तनिकटेप्रसादात्तेमहामते ३ इदानींकरुणींकृत्वा
कथयस्वदयामय कावर्तीचाभवत्तस्यद्विजस्याशिवशर्मणः ४ ध
र्मराजउवाच श्रूयतांभटश्चार्हलाहतांतेशिवशर्मणः विमानंचस
मानीयनानारत्नोपशोभितं ५ किंकिणीजालमालाढ्यंमुक्तादामवि
भूषितं तस्मिन्नारोप्यविप्रेशंसकुटुंबंदयामयी सदेहमुक्तंकृत्वाते
शिवलोकंनिनायसा ६ नानावाद्यमहानादेनमहार्चनपुरःसरं एवं

प्रतापोभक्तानांत्रायतांभीमहाभटाः ७ नगंतव्यंनगंतव्यंनगंतव्यं
कदाचन यस्मिन्यस्मिन्गंतव्यंलोकेदेवीसुसेवकाः प्रणमंतिमुदा
युक्तास्तत्तल्लोकनिवासिनः ८ यस्मिन्यस्मिन्नागतोलोकेविमानःशिव
शर्मणः चंद्रसूर्यादयःसर्वेपूजांचक्रुःसनातनीं ९ शचीदिकंस
मानीयपरमानंदसंयुताः वारंवारंनमश्चक्रुःपतित्वाचमुहुर्मुहुः ११
धन्यावयंसुधन्याःस्मोयेषांदर्शनगोचरः देवीपुत्रोभवान्जातोब्रह्म
विष्ण्वादिवंदितः १२ एवंसर्वत्रसत्कारंसलेभेकुलसत्तमः सनंदन
प्रसादेनकुलधर्मवशेनच १३ शिवलोकंततःप्राप्तारुद्ररूपैस्तैःपुष्प
वर्षणं त्रिदशैःपूज्यमानश्चपरमादरसंयुतैः १४ सएवरुद्रगणोजा
तःपुष्पदंतइतीरितः यन्मयोत्रिशितंशैवमहिम्नःस्तोत्रमुत्तमं १५
यस्यपानेनविश्वात्माशंकरंतोषमृच्छति इदंकथानकंश्रुत्वाकर्त
व्यंस्वस्थिरंमनः श्रीभगवानुवाच इतिवाक्यंसमाकर्ण्यधर्मराजोक्त

कौ० २०

10

मादरात् पप्रच्छुस्ते भटाद्यो महासंतुष्टमानसाः १७ भटा ऊचुः देवदेवे
शधन्योसि यमसंयमिनीपते कारुण्यलहरीस्तोत्रफलं न श्रुतमीश्व
रं १८ कृपां कृत्वा समाख्याहि वयं तेऽनुचरा विभो धन्योसि त्वं पितृपते
धन्यास्मो विभुना त्वया १९ श्रीधर्मराज उवाच साधु पृष्टं महाभागा भ
वद्भिर्लोकमंगलं कारुण्यलहरीस्तोत्रंफलं पृष्टं यतो मया २० का
रुण्यलहरीस्तोत्रं नोधिता सुंदरी शिवा प्रेषयामास कारुण्याद्देवी
वह्निनिवासिनी उवाच वचनं साक्षान्नोधिता परमादरात् आनंदस
प्लवे मग्ना हर्षाविष्टस्तु मानसा २२ श्रीवह्निवासिनि उवाच एकतः
सकला वेदा एकतः सकला मखाः तथापि ते स्तवस्यास्य कलां ना
र्हंति षोडशीं २३ ब्रह्महत्यासहस्राणि नारीहत्याशतानि च एका
हत्यात्तयं यांति सत्यं सत्यं महामते २४ पाठतोस्य पनः प्राप्तिः पुत्रपौ
त्रादिसंततिः सुस्थिरा जायते साक्षाद्यावच्चंद्रदिवाकरौ फलस्तुति

स्तत्रैवसंधेयाश्लोकमार्गतः पाठकानांयतःसिद्धिर्जायतेद्विजसत्त
मः २६ श्रीधर्मराजउवाच कारुण्यलहरीस्तोत्रफलस्तुतिरुदीरिता इ
दानींसर्वसिद्धांतंश्रुण्वेधर्मटसत्तमाः २७ ऊलधर्मस्थितोयस्तुस्वचा
सितमुखोभवेत् महापापयुतश्चापिनसदृश्योभवादृशैः २८ भव
तांनत्रगातनात्ममनाशोनसंशयः तस्माद्विचार्यगंतव्यंस्वचासितमु
खंप्रति श्रीभगवानुवाच इतिप्रोक्तोधर्मराजःपुनःप्रोवाचसत्तमः ते
षांदार्यापदेवेशोनियंतापुण्यपापयोः ३० श्रीधर्मराजउवाच अस्यायो
ग्यानस्वभटाश्चदेहस्वरणानहि नगंतव्यंनगंतव्यंस्वचासितमुखंप्र
ति ३१ श्रीभगवानुवाच इतिवाक्यंसमाकर्ण्यधर्मराजस्यधीमतः
भटानांनिश्चयोजातोभवानीभजनंप्रति ३२ इतिश्रीऊलयामिलेस
र्वागमाम्नायसिद्धागमनेहरनप्रबोधोनामाष्टमंयामिलं ८ ॥

इति ख्रिष्टधर्मकथापुस्तकं श्रीमुजर्द्‌साहिबेन प्रेषितं श्रीराजाधिरा
जे श्रीमद्रामसिंहाभिधानभूपालिभूपार्थम् ॥ ॥

रुद्रयामल

नं० १०५८

114